National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2022; 1(40): 238-240
© 2022 NJHSR
www.sanskritarticle.com

**आचार्यः विजयपालकच्छवाह**
आचार्यः विभागाध्यक्ष,
शिक्षाशास्त्रविद्याशाखा,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः,पुरी, ओडिशा

**Correspondence:**
**आचार्यः विजयपालकच्छवाह**
आचार्यः विभागाध्यक्ष,
शिक्षाशास्त्रविद्याशाखा,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः,पुरी, ओडिशा

# भारते शिक्षोद्देश्यानि तेषां महत्वञ्च

**आचार्यः विजयपालकच्छवाह**

कारणं विना कार्यं न भवति इत्यस्मात् प्रत्येकं कार्यस्य प्रयोजनं वर्तत एव। तत्र शिक्षायाः उद्देश्यं किम्? इति प्रश्ने उच्यते "बालकस्य सर्वाङ्गीण विकासकारणमेव शिक्षा" "सा विद्या या विमुक्तये" इति आसीत् ऋषिसमय "अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते"। (मुण्डकोप.१.१.४.,५) इति वेदघोषः सा एव प्रकृष्टा या विद्या मुक्तिं प्रददाति। उपनिषदामनुसारेण- द्वे विद्ये परा अपरा चेति, यया विद्यया लौकिकज्ञानं जायते सा अपरा विद्या, कथ्यते, यया अक्षर-ब्रह्म-विषयकं ज्ञानं प्राप्यते सा परा विद्या च। लोकेऽस्मिन् विद्या एव तज्ज्योतिः यद् मानवे ज्ञानज्योतिं ज्वालयति। अविद्यान्धतमसं निवारयति दुर्गुणं वारयति सद्गुणादिं संचारयति, कीर्तिं प्रसारयति अतः विद्या सर्वं साधयति। उक्तञ्च- "मातेव रक्षति पितेव हिते नियुङ्क्ते" (भोजप्र.-५)

वयं यदि प्राचीनेतिहासं पश्यामः तर्हि विभिन्नदेशानां शिक्षायाः उद्देश्यं भिन्नं भिन्नमासीत् यथा-
१.प्राचीनभारते शिक्षायाः मुख्यमुद्देश्यं मोक्षप्राप्तिरासीत्।
२.यूनानीदार्शनिकाः-नैतिक-सामाजिक-बौद्धिकाभिवृद्धिसम्पादकत्वेन सीमितानि भवन्ति।
३.प्राचीनरोम- राज्यकल्याणमिति शिक्षायाः मुख्यमुद्देश्यमासीत्।
४.ग्रीस - नागरिकत्वसम्पादनं तच्चकला-धर्म-दर्शनेन च पूर्णत्वं भजते।
५.स्पार्टा- नागरिकयुद्धार्थं सन्नद्धीकरणम् अर्थात् शारीरिकविकासः एव शिक्षायाः मुख्यं लक्ष्यमासीत्।

**पारम्परिकाणि शिक्षोद्देश्यानि -**

परम्परातः आगतानि पारम्परिकाणि अर्थात् अत्र परम्पराशब्देन भारतीयपरम्परा स्वीकृता। तत्र च भारतीयपरम्परा नाम वेदपरम्परा शास्त्रपरम्परा वा एतदनुसारं शिक्षोद्देश्यानि निम्नलिखितानि वर्तन्ते-

**१.ज्ञानप्राप्त्युद्देश्यम् -** पारम्परिकाणां शिक्षोद्देश्यानां मध्ये प्रथमं ज्ञानप्राप्तेः उद्देश्यं भवति। भारतीयदर्शने ज्ञानं तृतीयनेत्रत्वेन प्रतिप्रादितमस्ति तद्यथा -

**ज्ञानं तृतीयं मनुजस्य नेत्रम् समस्ततत्वार्थविलोकिदक्षम्।**
**तेजोऽनपेक्षं विगतान्तरायं प्रवृत्तिमत्सर्वजगत्त्रयेऽपि।।**

ऋचायां ज्ञानस्य महिमा विशेषरूपेण वर्णितमस्ति। ऋग्वेदस्य दशममण्डले एकं सूक्तं विद्यते यस्य च प्रतिपाद्यविषयः ज्ञानं भवति। तत्र ज्ञानसूक्तस्य देवता स्वयमेव ज्ञानमेव भवति। वैदिकदार्शनिकानां मतानुसारं ज्ञानं सत्यमुन्नतं तथा ब्रह्मरूपं च भवति। ज्ञानमाश्रित्यैव मनुष्यः देवत्वमधिगच्छति। यः मनुष्यः सर्वमधिगच्छति तथा इदमित्थम् इति अन्यान् बोधयितुं समर्थः भवति सः दैवतुल्यः भवति। एतत्सर्वं मनसि निवेशयन्तः तदानीन्तनजनाः ज्ञानप्राप्त्यर्थं यतन्ते स्म। अतः तदानीन्तनसमये शिक्षायाः उद्देश्यं ज्ञानप्राप्त्यर्थमासीत् इति कथयितुं शक्नुमः।

**२. ईश्वरभक्तेः धार्मिकभावनायाश्च विकासः** - पारम्परिकोद्देश्येषु द्वितीयमुद्देश्यमासीत् ईश्वरभक्तेः धार्मिक भावनायाश्च विकासः। जगदिदं ईश्वरेण सृष्टं तत्र च श्रुतिः प्रमाणं तद्यथा-

i) "ईशावास्यमिदं सर्वं यत् किञ्च ज्जगत्यां जगत्"

ii) "यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति'। (ईशा.उप.श्लो.-०१)

सर्वभूतेषु चात्मानं ततो न विचिकित्सति। (भगवदगीताज्ञानयोगः)

iii) यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः (महाभारतं किलपर्वः)

**अहिंसा परमो धर्मः। अहिंसा परमो दमः।**
**अहिंसा परमं दानम्। अहिंसा परमं तपः।** (म.भा.१३.१७)

**३) नैतिकविकासेन सह चरित्रनिर्माणं-शिक्षायाः** - तृतीयमुद्देश्यं भवति यत् नैतिकविकासेन सह चरित्रनिर्माणं। यदा बालकस्य मनुष्यस्य वा नैतिकविकासः भवति, तदा तस्य चरित्रं वर्धमानं भवति। नैतिकविकासः तदा सम्भवति यदा सदाचारपूर्णं जीवनयापनं भवति। एवञ्च को नाम आचारः ? सताम् आचारः सदाचारः सज्जनाः यथैवाचरन्ति व्यवहरन्ति च तदवदाचरणं सदाचारः। सदाचारे सर्वेषामेव सद्गुणानां समावेशो जायते। सदाचारमेव जीवनस्य सर्वविधोत्कर्षः।

**४) सामाजिककर्त्तव्यानां पालनं** - शिक्षायाः चतुर्थमुद्देश्यं सामाजिककर्त्तव्यानां पालनमिति। समाजे मनुष्यः वसति। अतः मनुष्यः सामाजिकप्राणी भवति। एवञ्च सामाजिकोत्तरदायित्वं मनुष्ये आगच्छति। शिक्षया एतत् सर्वं ज्ञापनीयं भवति। भगवता श्रीकृष्णेन गीतायाम् उक्तं यथा-

**यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।**
**स यत् प्रमाणं कुरुते लोकस्तदनुवर्तते।।** (गीता. ३/२१)

सामाजिककर्त्तव्यानां परिपालनं मनुष्यस्य कृते नितरामावश्यकम् इति। उक्तं यथा- सामाजिककर्त्तव्येषु सामाजिकनियमाः, रीतयः, आचार व्यवहाराः, भावाः संस्कारादयश्च भवन्ति। एतेषां पालनार्थं शिक्षया जनमनसि आग्रह उत्पादनीयः। अतेव वैदिककालीन-सामाजिकस्थिति सुदृढा, सुसंगठिता, सुव्यवस्थिता, सुशोभिता चासीत्। पञ्चतन्त्रे उक्तं यथा-

**अयं निजः परोवेति गणना लघु चेतसाम्।**
**उदारचरितानां तु वसुधैव कुदुम्बकम्।।** (अपरीक्षितका-१३८)

अतः सामाजिककर्त्तव्येषु मुख्यधर्मः यत् एकत्वबुद्धिः अपि च तस्य विषये आग्रहोत्पादनं शिक्षा द्वारा क्रियते।

**५.ऋणत्रयसिद्धान्तः -**

पारम्परिकशिक्षायाः पञ्चमसिद्धान्तः वर्तते। ऋणत्रयं नाम देवऋणं, पितृऋणं, ऋषिऋणं च। ऋणस्य परिशोधार्थं मानवः विविध कर्त्तव्यानां पालनं करोति। देवऋणशोधार्थं यागयज्ञादिकरणम्। ऋषि-ऋणपरिशोधार्थं ब्रह्मचर्यादिव्रतपरिपालनं विविधशास्त्रादीनामध्ययनं च, पितृऋणसम्पादनार्थं गृहस्थाश्रमे प्रविश्य सन्तानसन्ततीनां लालनपालनेन तेषां योग्यत्वसम्पादनं चावश्यकानि विद्यन्ते। अतः शिक्षायाः उद्देश्यमेवं स्यात्। येन मानवः ऋणस्य गुणत्रयस्य च सम्पूर्ति कर्तुं ब्रह्मचर्यधारणाय सन्तानोत्पादनाय यज्ञकर्मसम्पादनाय च समर्थो भवेत्। अस्मिन् सन्दर्भे शतपथब्राह्मणे उक्तञ्च -

**जायमानो वै ब्राह्मणस्त्रिभिर्ऋणं वाजायते।**
**यज्ञेन देवभ्यो ब्रह्मचर्येण ऋषिभ्यः प्रजया पितृभ्यः।।**
(तैत्तरीयसंहिता ६ काण्डं, ३ द्वितीय अ., मन्त्र सं. ४८)

**अधीत्यविधिवद् वेदान् पुत्रानुत्पाद्य धर्मतः**
**हष्ट्वाच विविधैः यज्ञैः मनो मोक्षे निवेशयेत्।।**
(मनुस्मृतिः - आचाराध्यायः)

**६.मोक्षप्राप्तेः उद्देश्यं** - शिक्षायाः मुख्यमुद्देश्यम् इदं भारतीयदर्शनमेव तत् प्रमाणम्। एवञ्च सांख्यदर्शने प्रकृतिपुरुषयोः भेदज्ञानेनात्मबोधः भवति, योगदर्शने कैवल्यप्राप्तिरेव शिक्षा भवतीति शिक्षायाः उद्देश्यत्वेन स्वीकरोति। शास्त्रपरम्परावादिनां मुख्यमुद्देश्यं मोक्षप्राप्तिरासीदिति कारणं मोक्षमुक्तिनिर्वाणं वा जीवनस्य परमं लक्ष्यं वर्तते। ज्ञानाग्नि स्वकर्मणां विनाशे आत्मसाक्षात्कारे च मोक्षप्राप्तिः सञ्जायते।

'उपनिषत्सु सैव परा विद्येति प्रकीर्त्यते। अत एव भूयो भूयो निर्दिश्यते- “सा विद्या या विमुक्तये” विद्यैव ज्ञानावाप्तिसाधनम्। ज्ञानेनैव ब्रह्मपथस्य साधु दर्शनात् तदभिमुखत्वम्, तेन च मोक्षाधिगमः तदेवाभिप्रेत्य प्रोच्यते - "ऋते ज्ञानान्न मुक्तिः" विद्ययैव तत्त्वज्ञानाधिगमाद् ब्रह्मरूपस्य अमृतत्वस्य च साक्षात्कारेण अमृततत्त्वप्राप्तिः ब्रह्मज्ञानम्, अमरत्वं च। उक्त- "विद्ययाऽमृतमश्नुते" इति।

**शिक्षायाः आधुनिकानि उद्देश्यानि -**

यदा वयं विभिन्नसमाजानां शिक्षायाः उद्देश्यानि पश्यामः तर्हि तेषु समानतायाः अभावः दृश्यते, किन्तु कानिचित् उद्देश्यानि एतादृशानि सन्ति। यानि सामान्यतया सर्वे देशाः समाजाश्च स्वीकुर्वन्ति, तथापि सामाजिक-राजनीतिक पृथकता भवति एव। अतः शिक्षायाः निम्नलिखितानि उद्देश्यानि वर्तन्ते-

**१.ज्ञानस्य उद्देश्यम्** - केचन विद्वांसः मन्यन्ते शिक्षायाः उद्देश्यं ज्ञानार्जनं भवति। तेषां कथनमस्ति "ज्ञानस्य कृते ज्ञानं" (Knowledge for the sake of knowledge)। एतेषु सुकरात-प्लेटो-अरस्तू-दान्ते कामेनियस-बेकन इत्यादयः प्रमुखाः सन्ति। सन्दर्भेऽस्मिन् कामेनियसमहोदयेनोक्तं-“अध्यापकेन स्वच्छात्रेभ्यः विभिन्नविषयाणाम् ज्ञानमधिकं प्रदानेनैव स्वकर्त्तव्यस्य बोधः जायते। येन बालकस्य ज्ञाने संचयं न भवति स व्यर्था।” प्राचीनभारते ज्ञानसञ्चये एतावत् बलं दीयते यत् गुरवः शिष्यान् सहस्रश्लोकान् रचयामासुः। अधुनाऽपि परम्परागत -पाठशालासु मकतबेसु च अस्यां पद्धतौ बलं दीयते। ज्ञानार्जनस्य इयं संकुचिता विचारधारा वर्तते। तत् ज्ञानं व्यर्थं यस्य वास्तविकजीवने सदुपयोगं न कर्तुं शक्यते। तदेव कथयति सुकरात- "वास्तविकज्ञानं प्राप्य व्यक्तिः सद्गुणसम्पन्ना भवति।"

**२.शारीरिकविकासस्य उद्देश्यम्** - सामान्यतया सर्वेषु देशेषु कालेषु च शिक्षायाः महत्वपूर्णमुद्देश्यं मन्यते शारीरिकविकासः। एतस्य उद्देश्यस्य समर्थकाः कथयन्ति यत् शिक्षया बालकस्य शरीरं स्वस्थं सुन्दरं बलवानं च भवेत्। यूनानस्य स्वराज्ये उद्देश्येऽस्मिन् बहुबलं दीयते, अतः तत्रात्याः जनाः वीरपुरुषाणां कथामधुनाऽपि रुचिपूर्वकं पठन्ति।

प्लेटो- “शिक्षाया: मुख्यध्येयमासीत् बालकस्य शारीरिकविकासः।"

रुसो- “बालकेभ्यः क्रीडाया: व्यायामस्य च प्रबन्धं भवेत्, तेन शारीरिकशक्त्या एव बालकः स्फूर्तिमान् क्रियाशीलश्च भवति।"

**३.चरित्रविकासस्य उद्देश्यम्** - शिक्षाया: महत्वपूर्ण मुद्देश्यं वर्तते चारित्रिक विकासः। शास्त्रे अस्य उद्देश्यस्य चर्चा सर्वत्र दृश्यते। शिक्षाशास्त्रिणः कथयन्ति यत् शिक्षायाः उद्देश्यं न तु ज्ञानस्यार्जनं, शारीरिकशक्तिबर्धनं च अपितु उत्तमचरित्रस्य निर्माणं भवेत्। सन्दर्भेऽस्मिन् राधाकृष्णमहोदयेनोक्तं - "भारतसहितं सम्पूर्णसंसारस्य कष्टानां कारणं शिक्षायाः सम्बन्धः नैतिकाध्यात्मिकमूल्यानां प्राप्तिर्न भूत्वा केवलं मस्तिष्कस्य विकासे भवति। भारतीयादर्शवादे शिक्षाया: चरित्रनिर्माणे बहुप्रशंसा कृता। गांधीमहोदयेन प्रतिपादितं यथा- "भारतस्य स्वतन्त्रतोन्नतरं शिक्षायाः उद्देश्यं भविष्यति चरित्रनिर्माणम्।" विषयेऽस्मिन् शास्त्रेऽपि उल्लिखितमस्ति यथा-

**“वृत्तं यत्नेन संरक्षेत् वित्तमेति च याति च।”** (म.भा.५.३६.३)

**४.सांस्कृतिकविकासस्य उद्देश्यम्** - मनुष्यः सामाजिकप्राणी वर्तते। सः समाजेन विना न तिष्ठति। तेन पूर्णतया स्वसंघटितसमाजस्य निर्माणं क्रियते। तस्य एका निश्चिता व्यवस्था भवति। एतादृशी निश्चितसम्पूर्णव्यवस्था एव संस्कृतिः कथ्यते। आचार-व्यवहारः परम्परा, यन्त्रम्, उपकरणं, नैतिकता, कला, विज्ञानं, धर्मः, विश्वासः, सामाजिकसंघटनम् आर्थिक-राजनीतिकव्यवस्थादीनि सर्वाणि तत्त्वानि मानवीयसमाजे समायान्ति। संस्कृतेः अर्थः “कस्यापि समाजे निवासस्य योग्यता" (Way of Living)। संस्कृतौ पक्षद्वयं वर्तते भौतिकाध्यात्मिकपक्षश्च संस्कृतिः एका सामाजिकसम्पत्तिः विद्यते, अतः वंशक्रमात् हस्तान्तरणं भवति। सुसांस्कृतिकमनुष्यः सभ्यः शिष्टः च जातः। तेन उच्चविचारः, कला, वस्तूनि, विशालमानवीयरुचयः अवबोधयन्ते च। अतः सः साधारणव्यक्तिं न भूत्वा महत्त्वपूर्णमनुभवति। ओटावे- “समाजस्य सांस्कृतिकमूल्यानां व्यवहारस्य प्रतिमानानां स्वतरुणसमर्थशीलसदस्यान् च प्रदानमेव शिक्षायाः कार्यं भवति।"

**५.आध्यात्मिकविकासस्य उद्देश्यं** - आदर्शवादिशिक्षायाः मुख्यं ध्येयं बालकस्य आध्यात्मिकविकासः भवति। यथा उपनिषदि वर्णितमस्ति यत्-

**श्लोकार्थेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः।**
**ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः**

(शङ्करदिग्विजयम् प्रथमाध्यायः - श्लोकः - ७३)

शङ्कराचार्येण वेदान्तदर्शने प्रतिपादितमस्ति तद्यथा- "तत् त्वम् असि", "अहं ब्रह्माऽस्मि" इति। भगवता बुद्धेनाऽपि उक्तं यथा- 'संसारे सर्वेषां दुःखानां कारणं वर्तते इच्छा, अतः एतस्याः दमनं कुर्यात्।"

आध्यात्मिकविद्यया एव मोक्षप्राप्तिर्जायते। यथा- उपनिषदि

**“सा विद्या या विमुक्तये।"**

**'ज्ञानात् ऋते न मुक्तिः।"**

**"तृतीयं ज्ञानं मनुजस्य नेत्रं।"**

**निष्कर्षः** - शिक्षाया: ज्ञानस्य शारीरिकविकासस्य, चारित्रिकविकासस्य, सांस्कृतिकविकासस्य च उद्देश्यानि वर्तन्ते। यदि वयं एतेषु एकमुद्देश्यं स्वीकृत्य शिक्षायाः निर्धारणं करिष्यामः, तर्हि वास्तविकी शिक्षा न प्राप्येत। अतः एतेषामुद्देश्यानां समन्वयेन एव वास्तविकी शिक्षा अर्थात् बालकस्य सर्वाङ्गीणविकासः जायते। यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति।

**सन्दर्भग्रन्थसूची**


१.मुण्डकोनिषद-गीताप्रेस, गोरखपुर

२.श्रीमद्भगवद्गीता-गीताप्रेस, गोरखपुर

३.भर्तृहरिनीतिशतकम् -कृष्णमणि त्रिपाठी

४.मनुस्मृतिः -कुल्लुक भट्ट

५.यजुर्वेदभाष्य-महीधराचार्यः

६.भोजप्रबन्धः - जीवानन्द विद्यासागर

७.महाभारतम् -गीताप्रेस, गोरखपुर

८.ईशावास्योपनिषद्-गीताप्रेस, गोरखपुर

९.हितोपदेश: मित्रलाभः - पं. श्री विश्वनाथशर्मणा

१०.निबन्धशतकम् - कपिलदेव द्विवेदी

११.शिक्षा के सामान्य सिद्धान्त - पी.डी.पाठक, एवं त्यागी

१२.उदीयमान भारतीय समाज में शिक्षक डॉ रामशकल पाण्डेय

१३.विकासोन्मुख भारतीय समाज में शिक्षा -डॉ. कर्णसिंह